# ॥ षष्ठोऽध्यायः ॥

ध्यानं
ॐ नागाधीश्वर विष्टरां फणि फणोत्तंसोरु रत्नावली
भास्वद् देह लतां दिवाकर निभां नेत्रत्रयोद्भासितां ।
माला कुम्भ कपाल नीरजकरां चन्द्रार्ध चूढाम्बरां
सर्वज्ञेश्वर भैरवाङ्ग निलयां पद्मावतीं चिन्तये ॥

ॐ ऋषिरुवाच ॥ १॥

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्ष पूरितः ।
समाचष्ट समागम्य दैत्य राजाय विस्तरात् ॥ २॥

तस्य दूतस्य तद्वाक्यं आकर्ण्या सुरराट् ततः ।
सक्रोधः प्राह दैत्यानां अधिपं धूम्रलोचनम् ॥ ३॥

हे धूम्रलोचनाशु त्वं स्वसैन्य परिवारितः ।
तामानय बलाद्दुष्टां केशाकर्षण विह्वलाम् ॥ ४॥

तत्परित्राणदः कश्चित् यदि वोत्तिष्ठतेऽपरः ।
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥ ५॥

ऋषिरुवाच ॥ ६॥
तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ।
वृतः षष्ट्या सहस्राणां असुराणां द्रुतं ययौ ॥ ७॥

स दृष्ट्वा तां ततो देवीं तुहिनाचल संस्थिताम् ।
जगादोच्चैः प्रयाहीति मूलं शुम्भ निशुम्भयोः ॥ ८॥

न चेत्प्रीत्याद्य भवती मद्भर्तार मुपैष्यति ।
ततो बलान्नयाम्येष केशाकर्षण विह्वलाम् ॥ ९॥

देव्युवाच ॥ १०॥
दैत्येश्वरेण प्रहितो बलवान्बल संवृतः ।
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥ ११॥

ऋषिरुवाच ॥ १२॥
इत्युक्तः सोऽभ्यधावत्तां असुरो धूम्रलोचनः ।
हुङ्कारेणैव तं भस्म सा चकाराम्बिका ततः ॥ १३॥

अथ क्रुद्धं महासैन्यं असुराणां तथाम्बिका ।
ववर्ष सायकै स्तीक्ष्णै स्तथा शक्तिपरश्वधैः ॥ १४॥

ततो धुतसटः कोपात् कृत्वा नादं सुभैरवम् ।
पपातासुर सेनायां सिंहो देव्याः स्ववाहनः ॥ १५॥

कांश्चित्कर प्रहारेण दैत्यानास्येन चापरान् ।
आक्रम्य चाधरेणान्यान् स जघान महासुरान् ॥ १६॥

केषाञ्चित्पाटयामास नखैः कोष्ठानि केसरी ।
तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥ १७॥

विच्छिन्न बाहु शिरसः कृतास्तेन तथापरे ।
पपौ च रुधिरं कोष्ठात् अन्येषां धुतकेसरः ॥ १८॥

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।
तेन केसरिणा देव्या वाहनेनाति कोपिना ॥ १९॥

श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।
बलं च क्षयितं कृत्स्नं देवी केसरिणा ततः ॥ २०॥

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिता धरः ।
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥ २१॥

हे चण्ड हे मुण्ड बलै र्बहुभिः परिवारितौ ।
तत्र गच्छत गत्वा च सा समानीयतां लघु ॥ २२॥

केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ।
तदाशेषायुधैः सर्वैर् असुरै र्विनिहन्यताम् ॥ २३॥

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।
शीघ्र मागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ॥ २४॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शुम्भ निशुम्भ सेनानी धूम्रलोचन वधो नाम षष्ठोऽध्यायः ॥ ६॥